# Vakratunda Stuti by Matsarasura

# વક્રતુણ્ડસ્તુતિઃ મત્સરાસુરેણ

## Document Information

Text title : Vakratunda Stuti by Matsarasura

File name : vakratuNDastutiHmatsarAsureNa.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 38

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વક્રતુણ્ડસ્તુતિઃ મત્સરાસુરેણ

મત્સરાસુર ઉવાચ -
નમામિ વક્રતુણ્ડં ચ ચતુષ્પાદં ચતુઃપરમ્ ।
ચતુર્દેહવિહીનં ચ બિન્દુમાત્રે વ્યવસ્થિતમ્ ॥ ૩૯॥

સાકારં ચ નિરાકારં માયારૂપધરં પ્રભુમ્ ।
નમામિ માયિનં તં ચ માયાહીનસ્વરૂપકમ્ ॥ ૪૦॥

જગન્મયં ચ તદ્ધીનં સર્વકામપ્રપૂરકમ્ ।
બ્રહ્મભૂયપ્રદં ચૈવ નમામિ ગણનાયકમ્ ॥ ૪૧॥

સિંહારૂઢં ચતુર્બાહું વિઘ્નનાશં નમામિ ચ ।
સિદ્ધિબુદ્ધિપતિં ચૈવ સિદ્ધિબુદ્ધિપ્રદાયકમ્ ॥ ૪૨॥

અનન્તલીલયા યુક્તં લીલાહીનં નમામિ તમ્ ।
અવ્યક્તં વ્યક્તરૂપં વૈ નમામિ સ્વહૃદિસ્થિતમ્ ॥ ૪૩॥

વેદાન્તવેદ્યં સજ્યોતિર્જ્યોતિષામપિ ભાસકમ્ ।
નમામિ સચ્ચિદાનન્દદેહરૂપં જગાનનમ્ ॥ ૪૪॥

યોગિનાં હૃદિ સંસ્થં ચ યોગિભ્યો યોગદાયકમ્ ।
ભાવાભાવમયં દેવં નમામિ ભવવર્જિતમ્ ॥ ૪૫॥

સર્વત્ર પક્ષહીનં તં સર્વપક્ષધરં પ્રભુમ્ ।
નમામિ વક્રતુણ્ડાખ્યં બ્રહ્મબ્રહ્માધિપં વિભુમ્ ॥ ૪૬॥

અહો ભાગ્યમહો ભાગ્યં યેન દૃષ્ટો ગજાનનઃ ।
સર્વાકારનિરાકારહીનોઽયં વક્રતુણ્ડકઃ ॥ ૪૭॥

શરણં તે પ્રપન્નોઽસ્મિ પાહિ માં ભક્તવત્સલ ।
પ્રવણં ત્વત્પદે નિત્યં સંસારોત્તારણૈષિણમ્ ॥ ૪૮॥

ઇતિ મત્સરાસુરેણપ્રોક્તા વક્રતુણ્ડસ્તુતિઃ સમાપ્તા । ૧.૩૮

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

*Vakratunda Stuti by Matsarasura*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*